# २१ चित् - चन

पिता - एतत् कः आनीतवान् ?

पुत्रः - अहम् एव आनीतवान् । कथम् अस्ति ?

पिता - उत्तमम् अस्ति । कुतः आनीतवान् भवान् ?

पुत्रः - अद्य सायं **कदाचित्** अहं विपणिं गतवान् आसम् । तत्र **कुत्रचित्** **कश्चन** एतस्य विक्रयणं कुर्वन् आसीत् ।

पिता - किं मूल्यम् उक्तवान् सः ?

पुत्रः - मूल्यं यदा पृष्टं तदा सः 'कति आवश्यकानि ?' इति पृष्टवान् । **कतिचित्** ददातु इति अहम् उक्तवान् । तदा सः - 'श्रीमन् ! एतत् इदानीं दुर्लभम् । **कुतश्चित् कथश्चित्** अहम् आनीतवान् अस्मि । एकम् एव अस्ति मम समीपे' इति उक्तवान् । अहम् अन्ते चर्चां कृत्वा विंशतिः रूप्यकाणि दत्तवान् ।

पिता - विपणितः **कानिचित्** विशालानि पिहितपत्राणि अपि आनेतव्यानि आसन् ।

पुत्रः - विपणिं प्रति गमनं ममापि निश्चितं न आसीत् । **केनचित्** मित्रेण सह अहम् अकस्मात् गतवान् ।

पिता - श्वः कार्यालयतः आगमनसमये **कानिचन** पिहितपत्राणि, **काश्चन** वर्णकूपीः, **कांश्चन** कूर्चान् च आनयति वा भवान् ?

पुत्रः - तात ! मम श्वः अन्यकार्याणि सन्ति । अतः अन्यं **कश्चित्** प्रेषयतु भवान् ।

पिता - अथवा श्वः **कस्यचित्** कार्यस्य निमित्तं मया एव विपणिः गन्तव्या भवेत् । पश्याम तावत् ।

## विशेषः

* **चित् - चन**

१. प्रश्नवाचकपदेन यदा 'चित्' 'चन' वा योज्यते तदा अनिश्चयार्थकत्वं सिद्ध्यति ।

उदा - कदाचित् (कदा इति स्पष्टं न ज्ञायते ।)
कुत्रचित् (कुत्र इति स्पष्टं न ज्ञायते ।)
कथञ्चित् (कथम् इति स्पष्टं न ज्ञायते ।)
कुतश्चित् (कुतः इति स्पष्टं न ज्ञायते ।)
कतिचित् (कति इति स्पष्टं न ज्ञायते ।)

२. 'किं'शब्दस्य सर्वरूपैः सह 'चित्' 'चन' वा योजयितुं शक्यते । तदा यानि रूपाणि सिद्ध्यन्ति तानि विशेषणानि भवन्ति ।

उदा - कश्चित् पुरुषः, काचित् बालिका, किञ्चन पुस्तकम् ।

| | पुंलिङ्गे | | स्त्रीलिङ्गे | | नपुंसकलिङ्गे | |
|---|---|---|---|---|---|---|
| | ए.व | ब.व | ए.व | ब.व | ए.व | ब.व |
| प्रथमा | कश्चित् | केचित् | काचित् | काश्चित् | किञ्चित् | कानिचित् |
| द्वितीया | कञ्चित् | कांश्चित् | काञ्चित् | काश्चित् | किञ्चित् | कानिचित् |
| तृतीया | केनचित् | कैश्चित् | कयाचित् | काभ्यश्चित् | (पुंलिङ्गवदेव | |
| चतुर्थी | कस्मैचित् | केभ्यश्चित् | कस्यैचित् | काभ्यश्चित् | रूपम् ।) | |
| पञ्चमी | कस्माच्चित् | केभ्यश्चित् | कस्याश्चित् | काभ्यश्चित् | ,, | |
| षष्ठी | कस्यचित् | केषाञ्चित् | कस्याश्चित् | कासाञ्चित् | ,, | |
| सप्तमी | कस्मिंश्चित् | केषुचित् | कस्याञ्चित् | कासुचित् | ,, | |

३. चित् - चन इत्येतयोः अर्थभेदः कोऽपि नास्ति । कश्चित् - कश्चन इत्यनयोः अर्थः समानः । एवम् एव इतरत्र अपि ।

## अभ्यासः - १८

**'कुत्रचित्' 'कदाचित्' 'कुतश्चित्' 'कथञ्चित्' 'कतिचित्'** इत्येतेषु केनचित् रूपेण अधस्तनवाक्येषु स्थितानि रिक्तानि स्थानानि पूरयत ।

१. सः ...................... अत्र आगच्छति, न सर्वदा ।

२. गृहे ...................... स्थापितवान् स्याम्, यतः कोषे नास्ति ।

३. कार्यं ...................... साधनीयम् । कथमिति न जानामि ।

४. शीतवायुः ...................... आगच्छति । कुतः इति पश्य ।

५. ...................... पत्राणि देहि । कति इति गणना मास्तु ।

६. कुत्र स्थापनीयम् इति मां मा पृच्छ । तत्रैव .............. स्थापय ।

७. ........ भवतः गृहम् आगमिष्यामि । कदा इति इदानीं वक्तुं न शक्नोमि ।

८. ............अहम् अपघातात् रक्षितः । कथम् इति देवः एव जानाति ।

९. देशे .......... कोलहलः प्रचलति । परिणामस्तु समग्रे देशे दृश्यते ।

१०. ................ एषा वार्ता श्रुता मया । 'कुतः' इति तु न स्मरामि ।

## अभ्यासः - १८

'अ' विभागे 'चित्/चन' युक्ताः शब्दाः सन्ति । 'आ' विभागे तेषाम् अर्थः निर्दिष्टः । 'अ' विभागस्थेषु आवरणेषु 'आ' विभागस्थस्य योग्यस्य वाक्यस्य सङ्ख्यां लिखत ।

| अ | आ |
|---|---|
| १. कश्चित् (          ) | १. 'कम्' इति स्पष्टं न ज्ञायते । |
| २. कश्चित् (          ) | २. 'काः' इति स्पष्टं न ज्ञायते । |
| ३. कांश्चित् (          ) | ३. 'कस्मिन्' इति स्पष्टं न ज्ञायते । |
| ४. काश्चित् (          ) | ४. 'केषु' इति स्पष्टं न ज्ञायते । |
| ५. काश्चित् (          ) | ५. 'कः' इति स्पष्टं न ज्ञायते । |
| ६. केषुचित् (          ) | ६. 'काम्' इति स्पष्टं न ज्ञायते । |
| ७. कस्मिंश्चित् (          ) | ७. 'कान्' इति स्पष्टं न ज्ञायते । |

**अभ्यासः - ९९**

**'चित्/चन'** सहितेन किंशब्दस्य योग्येन एकवचनरूपेण रिक्तस्थानानि पूरयत ।

| |
|---|
| उदा - अद्य मम गृहं ............... अतिथिः आगतवान् ।<br>- अद्य मम गृहं **कश्चित्** अतिथिः आगतवान् । |

१. तात ! .................. कथां कथय ।

२. भोः, ................ सेवकम् अत्र प्रेषय ।

३. ............ ग्रामे ........... कृषिकः वसति स्म ।

४. .............. बालकस्य पुस्तकम् एतत् ।

५. भवत्सु ................ छात्रेण एवं कृतं खलु ।

६. ............... विशिष्टलेखन्या लिखितं चित्रम् एतत् ।

७. अद्य नगरे ................ वीथ्यां कोलाहलः इति श्रूयते ।

८. एतानि पुष्पाणि ............... लतातः पतितानि ।

९. ............मित्रात् एतत् कथापुस्तकम् आनीतवान् अस्मि ।

१०. खाद्यं ............. स्थालिकायां स्थापय वत्से ।

११. .............. कार्यस्य निमित्तं बहिः गतवान् अस्ति सः ।

१२. .............. विशिष्टेन उद्देशेन एवं कृतम् अस्ति ।

१३. ........... दुष्टः ....... जनं मारितवान् चेत् भवतः किमर्थं खेदः ?

१४. ......... नगरे ......... धनिकः ....... बालकं पालयन् आसीत् ।

१५. ................ प्रबन्धं, .............. कथां, ............वर्णनं, ............. घटनां वा सर्वे छात्राः लिखन्तु ।

**अभ्यासः - १००**

'चित्/चन' सहितेन किंशब्दस्य योग्येन बहुवचनरूपेण रिक्तस्थानानि पूरयत ।

उदा - ------- ग्रामेषु जलाभावः अस्ति ।
**केषुचित् ग्रामेषु** जलाभावः अस्ति ।

१. ............................ जनानां प्रवृत्तिः विचित्रा भवति ।

२. कर्णाटके .................... शालासु कन्नडभाषा एव न श्रूयते ।

३. ............................ दिनेभ्यः सः अस्वस्थः अस्ति ।

४. .......................... कार्यकर्तृभिः एतत् कार्यं साधितम् ।

५. भोः ............ कर्मकरान् भवान् उद्यानकार्यार्थं प्रेषयतु । .............. कर्मकरीः वृतिनिर्माणार्थं प्रेषयतु ।

६. नलिकासमीपे ................ गृहिणीभिः कलहः कृतः ।

७. एतस्य कार्यालयस्य ............ प्रकोष्ठेषु दीपव्यवस्था सम्यक् नास्ति ।

८. एतासु ...................... बालिकानां प्रगतिः तृप्तिकरी नास्ति ।

९. ................. स्पर्धासु बहवः छात्राः भागं गृहीतवन्तः ।

१०. ........... बालकानां गृहे पठनार्थं अनुकूलः परिसरः न भवति ।

११. ............ बालिकाभ्यः व्याकरणं रोचते, पुनः ........ न रोचते ।

१२. आर्य ! नगरात् ........ कण्डोलान्, .......... सम्मार्जनीः, .......... खनित्राणि च भवान् आनाययतु कृपया ।

१३. एतस्मिन् पुस्तके ........ कथाः समीचीनाः । .......... कथानां शैली उत्तमा अस्ति । .......... कथासु पात्रचित्रणम् अपूर्वम् अस्ति ।

१४. भवत्सु ........ छात्रेण सत्यम् उक्तम्, ........ बालिकया असत्यम् उक्तम् ।

१५. ग्रन्थालयस्य ......... पुस्तकानाम् आवरणं नष्टम् । .......... पुस्तकेषु ......... पुटाः एव न सन्ति !